श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीस्कान्धपुराणम् ।।

**अनुवादकः - डा.माधवपाण्डुरङ्गी**

## प्रभासखण्डः

### अध्याय - १

### (मङ्गलाचरणम्)

आदावत्राध्याये मङ्गलं विधीयते । ततः नैमिषारण्यवासिनः ऋषयः रोमहर्षणं सूतं पुराणमिदं प्रप्रच्छुः । व्याससेवया सम्यग्ज्ञातपुराणः सूतः, 'श्रीवत्साङ्कं जगद्योनिं हरिमोंकाररूपिणं अप्रमेयं गुरुं देवं निर्मलं निर्मलाश्रयम्' (१२) इत्यादिस्वरूपं नारायणं नमस्कृत्य उपदेष्टुं प्रारभत । गर्भादानादिना सुसंस्कृतः श्रवणाधिकारी भवति । पुराणप्रमुखमिदं पुरा महेश्वरः पार्वत्याग्रे ब्रह्मादिसन्निधौ अकथयत् । ततः पार्वती स्कन्दाय, स च नन्दिगणाय नन्दिगणः कुमाराय, कुमारश्च व्यासाय, व्यासः मां प्रत्युपदिदेश ।

### अध्यायः २

पुराणनाम इत्यादि - पुरा ब्रह्म उग्रम् अतपत् । ततस्तन्मुखात् शतकोटिप्रविस्तरं पुराणं, सषडङ्गपदक्रमाः वेदाश्च आविर्भूताः । अखिलमेतद् व्यासः अष्टादशधा व्यभजत । तेषु प्रमुखाः नरसिंह स्कन्दादयः । साम्ब-सौर-प्रभृति उपपुराणाश्च सन्ति । शतकोटिविस्तरं पुराणसाहित्यं, प्रतिद्वापरयुगे, चतुर्लक्षमितेन विभजति । तेषां संख्या नामानि च वर्णितानि । तद्यथा

| | |
|---|---|
| ब्राह्मपुराणम् - १०,००० श्लोकाः | पद्म - ५५,००० |
| विष्णु - २३,००० | वायु - २४,००० |
| भागवत - १८,००० | नारद - २५,००० |
| मार्काण्डेय - ९,००० | आग्नेय - १६,००० |
| भविष्यत् - १४,५०० | ब्रह्मवैवर्त - १८,००० |
| लिङ्ग - ११,००० | वराह - २४,००० |
| स्कान्द - ८०,००० | वामन - १०,००० |
| कूर्म - १७,००० | मत्स्य - १४,००० |
| गरुड- १९००० | ब्रह्माण्ड -१२,२०० |

अथ - उपपुराणानि

पद्मपुराणस्य - नारसिंह- १८,०००

नन्दि -

साम्ब -

आदित्य

सात्विकपुराणेषु - विष्णुः, राजसपुराणेषु ब्रह्मा, तमसपुराणेषु शिवः आधिक्येन वर्ण्यन्ते । ततः व्यासः वेदार्थपरिबृंहितं महाभारतं अरचयत् । शतकोटिविस्तरं (मूलं) रामायणं भुवि वाल्मीकिना प्रख्यातम् ।

**स्कान्दपुराणे - सप्तखण्डानि**

१. माहेश्वर, २. वैष्णव, ३.ब्राह्म, ४.काशी, ५. रेवा, ६. नागर, ७. प्रभासः

**अध्यायः - ३**

प्रभासक्षेत्रमहिमा - ततः सूतः ऋषीन् प्रति एवं वर्णयति । पुरा पार्वती कैलासशिखरोत्तमे शिवं बहुधा संस्तुत्य अस्तौत् । तदा प्रसन्नः, शिवः, प्रसन्नमनस्कः तामपि धर्मादिस्वरूपा मासे इत्यवर्ण्य वरं च वृणीहि इत्यवदत् । तदा पार्वती

पृथिव्यां यानि तीर्थानि पापघ्नानि शिवानि च ।
तानि देवेश कात्स्न्र्येन यथावद् वक्तुमर्हसि ।। (स्का.पु.प्रभास.खं.३.८९) इत्यवदत् ।

तदा शिवः तीर्थानि एवं अवर्णयत् -

भूमौ नैमिषारण्यं , अन्तरिक्षे पुष्करं, एवं केदार-प्रयाग-विपाशा-अर्मिला-कर्णवेणा= चन्द्रभागा -सरस्वती- गंगासागरसङ्गमः - काशी- अर्धतीर्थ-गङ्गाद्वार-हिमस्थान महातीर्थः - मायापुरी-शतभद्रा - सिन्धु - इरावती - कपिला = शोणमहानद- समुद्र- कौशिकी-गोदावरी - देवखात-गया-द्वारावती=सर्वपापनाशकाः सन्तीति ।

पुनः पार्वत्या अत्युत्कृष्टक्षेत्रविषये पृष्टः शिवः पवित्रतमं प्रभासक्षेत्रं वर्णयितुमारभत । प्रभासक्षेत्रं दुर्लभं महत्पुण्यलभ्यं मम अतीव प्रियकरं अस्ति । अत्रस्थं मल्लिङ्गं दुष्प्रण्यम् ।

इदं महापातकनाशनं ये

सा सञ्चीय सपदि मध्येसिन्धुं प्रवेक्ष्यति । तदा भवानपि यज्ञवराहं स्तुवन् अशङ्कं महार्णवे तामनुव्रजतु । ततः पाताले चम्पकावतीं नगरीं द्रक्ष्यसि, इत्युक्त्वा नारदः अन्तर्दधे । राजा अपि नारदोक्तमार्गेण समुद्रं प्रविश्य, यथाकालं चम्पकावतीं प्राप । तत्र विद्याधरबालिकां मलयगन्धिनीं ददर्श । अद्भुतं तस्याः सौन्दर्यं वीक्ष्य राजा निश्चेष्टोऽभूत् । मुहूर्तं यावत् तामेव वर्णयन् तस्या अन्तिकं जगाम राजा । सुन्दरं राजानं दृष्ट्वा साऽपि लज्जिता तं प्रति गत्वा - को भवान् इति पृष्ट्वा, सपद्येव भयङ्कराकारः, दुराचारः, दुर्जयः, कङ्कालकेतुर्दानवः अत्रागच्छति, अतः त्वं अन्धकारमये आयुधागारे गुप्तं समातिष्ठ, उमादेव्या वरात् सः मे कन्याव्रतं भङ्क्तुं न समर्थः । परश्च तृतीयायां सः दुरात्मा मे पाणिग्रहणं सञ्चिकीर्षति । परन्तु तद्भीतिं मा कुरु, मम शापतः सः गतायुः' इति । ततश्च राजा विद्याधर्युक्तप्रकारेण शस्त्रागारे निगूढवत् स्थितः । अथ सायं दानवः समागतः । कङ्कालकेतुः विद्याधरीं प्रति एवं जगाद - सुन्दरि! परश्वः विवाहो भवत्येव । दासीसहस्रं ते दास्यामि । मत्पाणिग्रहणात् त्वं दिव्यभोगानि भोक्ष्यसि, इत्यादि । एवमुक्त्वा दानवः स्वायुधं त्रिशूलं स्वोरसि निक्षिप्य निद्रितः । तद्वीक्ष्य विद्याधरी, पार्वतीं संस्मरन्ती गूढस्थितं शत्रुजितं 'प्राणनाथ'! इत्याह्वयत् । विद्याधरी सत्वरं तत् शूलं जग्राह । आगतः शत्रुजित् तच्छूलं स्वीकृत्य दानवं वामपादेन तताड । एवमुत्थाप्य दानवं राजा विष्णुं स्मरन् युयुधे । दानवः विष्णुना रक्षितं राजानं प्रतिघातुं न शशाक । तदा राक्षसः - त्वं विष्णुरेव मानवरूपेणागतः । यदि त्वं बलवान् तर्हि मम एकं विधेहि । बलिनः कैटभादयः कपटेन त्वया हताः ; न बलेन । त्वं सर्वानपि छलेनैव अहन् । अतः ममायुधं ममैव देहि, मया युध्यस्व' इति ।।

ततः द्वयोः युद्धः प्रावर्तत । राजा त्रिशूलेन दानवस्य वक्षसि जघान । मृतो दैत्यः । रक्षिता मलयगन्धिनी । ततः स राजा 'कन्ये! कृतं ते वाञ्छितं किं त इतोऽपि करवाणि?' इति पप्रच्छ । तदा सा विद्याधरी 'उदारवीर! त्वं निजप्राणान् पणीकृत्य मां रक्षयित्वा, तादृशाम् अदूषितां कुलकन्यां किमिति मां पृच्छसि?' इति प्रतिवाक्यमब्रवीत् । ततः तत्र नारदः पुनराजगाम । महर्षिरेव तयोर्विवाहं कारयामास । उभावपि पातालात् वाराणसीं ययतुः । वाराणसीं प्राप्य मलयगन्धिनी आत्मानं कृतकृत्यां मेने । विद्याधरी राजानं प्रति अभीष्टतृतीयाव्रतं कर्तुम् अनुज्ञां प्रार्थयामास । ततश्च राजा किं तद् व्रतं, कथं करणीयं, इत्यादि रहस्यं कथयितुं पप्रच्छ ।।

अध्यायः - ८३

मलयगन्धिनी अभीष्टतृतीयाव्रतम् अधिकृत्य कथयति - पुरा नारदः कुबेरपत्न्यै ऋद्धिदेव्यै व्रतमिममुपदिदेश । तद् व्रताचरणप्रभावेण ऋद्धिदेवी नळकूबरनामानं पुत्रं प्राप । एवमनेके स्त्रियः अनेन व्रताचरणेन पुत्ररत्नानि प्रापुः । उन्मुखं स्तनं धयता स्तनन्धयेन सहिता गौरी देवी विधिना सम्पूज्या । मार्गशीर्षमासस्य शुक्लतृतीयायां तण्डुलपात्रोपरि कलशं संस्थाप्य, अविच्छिन्नं नूतनं हरिद्राचूर्णरञ्जितं वस्त्रं पात्रोपरि न्यस्य तस्योपरि

रविरश्मिविकासितमेव कमलमलङ्कृत्य, तत्र चतुर्भारकनकमयचतुर्मुखप्रतिमां संस्थाप्य, रत्नैः, पीताम्बरैः, फलैः पूजयेत् । रात्रौ निद्रां विहाय महोत्सवैः जागरणं कार्यम् । व्रतदिने उपोष्य आचार्याय सल्लक्षणयुक्तां कपिलां दद्यात् । ततः आचार्याय परेऽहनि चतुर्थ्यां पूजामूर्तिं दद्यात् । 'नमो विश्वविधानज्ञे विधे विविधकारिणि । सुतं वंशकरं देहि तुष्टाऽमुष्माद् व्रताच्छुभात्' ।। इति ।। नारदमुखेन व्रतमिदं श्रुत्वा राजा पत्न्या सह सपद्येव यथाविधि व्रतमाचचार । चिरकाले एव राज्ञी अन्तर्वत्नी बभूव । गर्भिण्याः मलयगन्धिन्याः भक्त्या तुष्टा गौरी देवी, तया प्रार्थितं- 'साक्षाद्विष्ण्वंशसम्भवं पुत्रं देहि, सः क्षणात् स्तन्यपानेन विना षोडशाब्दाकृतिः जायताम्, एवंभूतः सुतः मे स्यात्' इति वरं- तद् ददौ ।।

अतीतेषु नवमासेषु मूलानक्षत्रे पुत्रोऽजनि । अतः हिताः वृद्धाः 'दुष्टनक्षत्रजं पुत्रं राजसौख्यार्थं त्यज' इति तां व्यजिज्ञपन् । सा च मन्त्रिणां वाक्यमाकर्ण्य पतिमेव देवतां मन्यमाना वरप्राप्तमपि सुतं अत्याक्षीत् । ततश्च सा नृपाङ्गना दासीमाहूय- ''पञ्चमुद्रमहापीठे विकटा नाम मातृका वसति । तस्या पुरतः शिशुमिमं स्थापयित्वा, 'असौ शिशुः गौर्या दत्तः, तवाग्रे निवेदितः । पत्युः प्रियैषिण्या राज्ञ्या मन्त्रिवचनात् त्यक्तः, ते समर्पितः' इत्युक्त्वा तत्रैव शिशुं त्यज'' इत्याज्ञापयामास । सा दासी तथैवाकरोत् । विकटा परिचारिकां योगिनीमाहूय- 'मातृगणेषु शिशुमिमं नीत्वा प्रयत्नतः रक्ष्यताम्' इत्याज्ञापयामास ।।

श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीस्कान्दपुराणम् ।।

**अनुवादकः - डा. बि.एस्.हयवदनः**

## काशीखण्डः

### अध्याय - १

अथ व्यास उवाच - नारदः कदाचित् नर्मदेषु स्नात्वा ओङ्कारेश्वरमभ्यर्च्य व्रजन् विध्यं ददर्श । नानाविधैः तरुभिः, फलवृक्षैः, विराजितः स नगः स्वस्मिन् स्थावरैश्च जङ्गमैश्च सह वसुमतीमिमां अन्वयार्थाख्या चकार । तादृशः स नगेन्द्रः आगच्छन्तं नारदं मुनिं दृष्ट्वा ससम्भ्रमं अर्घ्यपाद्यादिभिरुरुपचारैः सम्मानयत्, दूरादेव प्रत्युज्जगाम । ब्रह्मसूनुं तेजस्विनं मुनिं दृष्ट्वा विन्ध्यः फुल्लमनाः संवृत्तः । तस्य चित्तशान्तिः सम्भूय तमः दूरान्निस्ससार ।

अथ मुनये सम्यगुपचरित्वा कुशलादि पृच्छामापूर्य, एवं पप्रच्छ विन्ध्यः - 'हे मुने ! अद्य त्वदङ्घ्रिरजसा मे रजः परिहृतः । तदिदं मे सुदिनमभवत् । गिरिष्वहमद्य धन्यः संवृत्तः । किमहं मुनये करोमि किं मयाद्य भविष्यति ? कृपया आज्ञापयन्तु' इति ।

तदा नारदः दीर्घं निश्वस्य तूष्णीमवास । तदा विन्ध्यः - 'ब्रह्मन् ! सर्वार्थकोविद ! तव उच्छ्वासकारणं कृपया ब्रूहि । यतः त्रिलोक्यां त्वया अदृष्टं किमपि नास्ति । पुराणाः पुरुषाः मेर्वादिषु धराधरत्वमारोपयिष्यन्ति परन्तु अहमेव भूभृतां वरः भूधरश्चास्मि । सन्ति अनेके पर्वताः निषध-नील-मलय-किष्किन्ध-क्रौञ्च-सह्यद्याः, परं ते भुवो भारसहा न भवन्ति' इति च उवाच ।

तदा मुनिरेवमचिन्तयत् - 'अखर्वगर्वसंसर्गः महत्वाय न कल्पते । श्रीशैलमुख्याः शैला अणवोऽपि येषां शिखरमात्रादिदर्शनेन सतां मुक्तिदायिन भवन्ति । अतः महाशरीरवत्वमेव न महत्वाय भवति । अतोऽद्य अस्य बलमालोक्यम्' इति । एवं निश्चित्य, विन्ध्यं प्रति एवमुवाच- 'गिरिसारं विवृण्वता भवता सत्यमेवोक्तम् । परन्तु शैलेषु शैलेन्द्र इति ख्यातो मेरुः त्वम् अवमन्यते । अतो मया निश्वसितम् । स्वस्त्यस्तु तुभ्यम्' इति । ततो मुनिः व्योमवर्त्मनि ययौ । गते मुनौ खिन्नमनाः विन्ध्यः सततं विचिन्तयत् । एवमस्य चिन्ताक्रमः -'चिन्ताग्निः सर्वथा बलिष्ठः मां दहति । नास्य भेषजमस्ति । किं करोमि, क्व गच्छामि ? कथमहं मेरुं जयामि । किमहं तस्य शिरस्युत्प्लुत्य पतामि न पतामि ? अहोकष्ठमिदं, पूर्वमस्मद्गोत्रः कश्चित् शक्रमकोपयत् । तेन कोपेन पाकशासनः अस्मान् पक्षहीनान् चकार । अपक्षस्य मम चेष्टितं धिक् ।

‘अथवा कथं स मेरुः तथा मया उच्चैः स्पर्धते ? नारदे कथं वा अलीकवात्त्वां सम्भावयामि । अथवा किमेतैः चिन्तनैः व्यर्थैः ? विश्वेशं शरणं यायां समे बुद्धिं प्रसास्यति । एवमिदानीं चिन्तां हित्वा एतदेव अविलम्भेन करोमि ।

नूनं स दिवाकरः मेरुः बलाधिकम् इति निश्चित्य सग्रहर्क्षगणः मेरुं प्रदक्षिणीकरोति ।’ इति विचिन्त्य विन्ध्याद्रिः ऊर्ध्वं ववृधे । एवं विन्ध्याद्रिः सूर्यस्य अध्वानं निरुध्य आत्मानं कृतकृत्यं मेने । यः सूर्यं दक्षिणे प्रक्रमणरतं यमयति स एव कुलीनः इति चिन्तयत् । एवं कृत्वा चिन्तां हि त्वा अरुणोदयमाकाङ्क्षन् स्थिरोद्यमः तस्थौ ॥

**अध्यायः - २**

**व्यास उवाच** - अस्य जगत आत्मा सूर्यः उदयगिरावुदियाय । एवं क्रमात् आशानाथः दक्षिणाशां प्रति प्रस्थितवान् । परन्तु अग्रे गन्तुमशक्या अभवन् वाजिनः । तदा अनूरुरेवं व्यजिज्ञपत् ‘हे भानो ! विन्ध्यः उन्नतो भूत्वा गगनं निध्याय स्थितः । सः मेरुणा स्पर्धयन् एवं करोति’ इति । तदा सूर्यः ‘अहो गगनमार्गोऽपि रुध्यते आश्चर्यमेतद् इत्यचिन्तयत् । सूर्यः निमेषार्धे द्व्युत्तरशताधिकद्विसहस्रं योजनानि क्रमति । एतादृशः सः विन्ध्येन रुद्धः चिरं मार्गमध्ये तिष्ठति ।

एवं च, चण्डघृणिकिरणतप्ता अभूवन् प्राच्योत्तरदिशगताः जनाः । पाश्चात्याः दाक्षिणात्याश्च निद्रिताः सन्तः सतारग्रहं खमेव वीक्षन्ते । एवं च सूर्याभावात् केचन निशाकराभावात्केचन कालव्याकुला अभवन् । किमयं प्रलय अस्थित इति दिग्भ्रमिताः जनाः संवृत्ताः । एवं च विन्ध्यरुद्धस्य सूर्यस्य चलनाभावात् सुरासुरनरपन्नगादि लोकाः व्याकुलिताः अभूवन् । ततः सर्वे समासाद्य ब्रह्माणं शरणं ययुः । विविधैः स्तोत्रैः ब्रह्माणं तुष्टुवुः । - ‘नमो हिरण्यरूपाय ब्रह्मणे ब्रह्मरूपिणे ।

अविज्ञातस्वरूपाय कैवल्यायामृताय च’ इत्यादि (दैवैकृता ब्रह्मस्तुतिः - ३-४१पर्यन्तम्)

स्तुत्वा प्रणिपत्योत्थितान् सुरानुद्दिश्य विधिरेवमुवाच - अयं सत्य लोकः । किमत्रपि यूयं समाकुलाः । पश्य तु सर्वेऽत्र पुण्यजनाः समाश्रिताः वेदाद्याः, पुराणाद्याः, शुद्धवपुषः, तपोधनाः धर्मकाङ्क्षिणः, व्रतिनः, पतिव्रताः, सदाचारादिकर्मणिरताः, काशीवासिनः, शुद्धवपुषः निस्पृहाः वाराणसी-गयादितीर्थेषु व्रतकर्मणि रताः, वैष्णवाः गावः, ब्राह्मणाः, इष्टापूर्तकारिणः, ऋषयः गोसेवारताः - अत्र लोके वसन्ति ।

श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीस्कान्धपुराणम् ।।

**अनुवादकः - डा.श्रीकान्तबायरी**

## प्रभासखण्डः

### अध्याय - २४७

पिङ्गानदीमाहात्म्यवर्णनम् - परमशिवः पार्वत्यै प्रभासक्षेत्रमहिमानं वर्णयति । तत्र समुद्रस्य पश्चिमभागे प्रवहती नदी पिङ्गला इति प्रख्याता । मनुष्याः अस्याः नद्याः दर्शनमात्रेण सुन्दराः भविष्यन्ति । पुरा कुरूपिणः ऋषयः सोमेश्वरं दर्शयितुं प्रभासक्षेत्रं प्राप्नुवन् । तत्र उत्तमाश्रमे तपः कृत्वा नद्यां स्नानं चक्रुः । यदा ते नद्याः निमज्जुः तदा सर्वे सुरूपाः दृढकायवन्तश्च बभूवुः । कृष्णवर्णाः वयं अत्र निमज्जनेन पिङ्गा बभूविम । अतः इतः परं इयं नदी पिङ्गला इति ख्यातिं प्राप्नोतु इति ते ऋषयः अकथयन् । तथैव इयं पिङ्गला अतिपुण्यनदी बभूव । अस्यां ये निमज्जन्ति तेषां कुले न कुरूपाः पुत्राः जायन्ते । अत्र स्नानदानश्राद्धादिना पितृमेधफलमाप्नोति ।

अत्रैव पार्वतीदेवी पिङ्गलादेवीरूपेण वर्तते । तस्याः दर्शनं कृत्वा उपवासं कुर्यात् । तेन सकलेष्टार्थं अवाप्स्यति । तथैव शुक्रेश्वररूपिणं रुद्रमपि दर्शनीयम् । तेन मनुष्याः सकलपापनिर्मुक्ताः भवन्ति ।

**अध्यायः - २४८**

**ब्रह्मेश्वरमाहात्म्यवर्णनम् -** पुरा चतुर्मुखः चतुर्विधसृष्टिं प्रारब्धवान् । तदा सः नानाविधान् प्राणिनः असृजत् । अन्ततः एकां अनुपमसुन्दरीं असृजत् । यदा सा अगिणितरूपवती बभूव तदा स्वयमेव स्वयंभूः तस्यां रतिमनः चक्रे । तदर्थं पञ्चममुखेन तां अप्रार्थयत् । यदा पञ्चममुखः स्वदुहितरमेव एवम् अप्रर्येयत् तदा पापवशेन तत् शिरः खगरूपं धृतव अधः अपतत् । ततः पुत्री मोहपापविनाशाय प्रभासे आगतः । तत्र सरस्वत्यां स्नानं कृत्वा पुलिनरूपिणं शिवलिङ्गं प्रतिष्ठाप्य पापरहितो बभूव । अतः यं मनुष्याः अत्रागत्य स्नानं कृत्वा ब्रह्मेश्वंर दर्शयति ते सर्वपापविनिर्मुक्ताः भविष्यन्ति ।

अध्यायः - २४९

**सङ्गमेश्वरमाहात्म्यवर्णनम्** - पुरा उद्धालकमहर्षिः सरस्वतीपिङ्गादेवीसङ्गममध्ये तपः समाचरत् । यदा सः घोरं तपः समाचरन् आसीत् तदा तत्पुरतः लिङ्गमेकं समुद्भूत् । तस्मिन्नेव समये अशरीरवागपि बभूव । भो उद्धालक अद्यप्रभृति मम वासः अत्र नित्यं भविष्यति इति ।

यस्मात् अत्र सङ्गमे लिङ्गं समुत्पन्नं तस्मात् सङ्गमेश्वर इत्येव नाम चास्य भविष्यति । येऽत्र स्नानं नराः कुर्वन्ति ये च सङ्गमेश्वरं वीक्ष्यन्ते ते यान्ति परमां गतिम्' इति ।

**अध्यायः - २५०**

**गङ्गेश्वरमाहात्म्यवर्णनम्** - अत्रैव महाविष्णुः प्रलयकाले स्नानार्थं गङ्गां अत्रैव आहूय स्नातवान् । तदा गङ्गा तस्मिन् देशे ऋषिमुनिसमूहं दृष्ट्वा स्वयमेव एकं लिङ्गं स्थापितवती । तदेव गङ्गेश्वर इति ख्यातिं अगमत् ।

**अध्यायः - २५१**

**शङ्करादित्यमाहात्म्यवर्णनम्** - तत्रैव पूर्वं स्वयं शङ्करेण प्रतिष्ठितं शङ्करादित्यमिति प्रसिद्धं क्षेत्रं वर्तते । शुक्लायां षष्ठ्यां एनं यः पूजयिष्यति सः दिवाकरः देवः यत्रा, तत्र गमिष्यति । रक्तचन्दमिश्रैः, रक्तपुष्पैः समाहितः ताम्रपात्रे यः अर्घ्यं ददाति सः सिद्धिं परां यास्यति ।

अध्यायः - २५२,२५४,

शङ्करनाथमहात्म्यवर्णनम्- तत्रैव भास्करेण प्रतिष्ठापितं शङ्करनाथलिङ्गं वर्तते । तस्य दर्शनेन उत्तमस्थानं नरः प्राप्स्यति । ततः हि रव्या तद्याः उत्तरभागे सर्वपातकनाशनं गुफेश्वरं नत्वा मानवः सर्वं अवाप्नोति । ततः पश्चात् तत्रैव देवदानववन्दितं सर्वपातकनाशनं घण्टेश्वरं लिङ्गं दर्शनीयम् । अष्टम्यां सोमवासरे अस्य पूजनेन सकलां सिद्धिं मानवः प्राप्नोति ।

**अध्यायः - २५५**

**ऋषितीर्थमाहात्म्यवर्णनम्** - घण्टेश्वरस्य पश्चिमे भागे ऋषितीर्थमिति प्रसिद्धिं तीर्थं वर्तते । अत्र पुरा अङ्गिरागौतमागस्त्यादयः शताधिका ऋषयः स्वशिष्यप्रशिष्यैः साकं घोरं तपः आचरन्ति स्म ।

एवं सति एकदा तत्र महती अनावृष्टिः समभूत् । तदा सर्वे ऋषयः धान्यादिकं अलब्ध्वा महान् कष्टं प्राप्नुवन् । तदा उपरिचर इति ख्यातः चक्रवर्ती तत्रागत्य ऋषिभ्यः मुद्गान् माषान् व्रीहीन् तथा रत्नकाञ्चनानि दातुं उद्युक्तः बभूव । तदा ऋषयः प्रतिग्रहं विनिन्दन्तः नानाधर्मस्तोकान्